(1) अथ विवाणे अष्टमाध्याय प्रारंभः।

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

कौ॰ टी॰ ८ श्रीगणेशाय नमः ॥ ॥सर्वस्य द्वे ननु सर्वशब्दस्यालोंत्यस्यानिवृत्त्यर्थत्वात्स्यानुपपत्तिरत आह सर्वशब्द इति उपादानादिति॰

१ यत्रापि नित्यवीप्सयोरित्यादौ न काचिद्विशेष उपादीयते तत्रापि विशेषानुपादानादेव सर्वेषां शब्दानां सिद्धमिति द्व्यप्रका

राणां संभव इति भावः स्थानषष्ठ्यभावादिति नित्यवीप्सयोरित्यादावि भावः परेरित्यादौ स्थानषष्ठीसत्वादाह कथं चास्मि

निः सामर्थ्यं लभ्येतेति नित्यवीप्सयोर्वर्त्तमानस्य पदस्य हि तद्विधानादित्यर्थः हलंतेष्विति तत्र हि अंत्यस्य द्विर्वचनेपि आ

देशस्यानेकाल्त्वेनापवादविषयसत्वानुस्वारलोपः सामर्थ्यात्सर्वस्यैव भविष्यतीति भावः यथा आआ इति त्युटः प्रथमस्योस्य

त्रयपाचयुग्मदभ्यांडः सरत्यत्र शित्वप्रत्याख्यानपक्षे आ इति प्रश्लेषेणामवादेशत्वमुक्तं द्वाविकारावित्यादि पुर्वपभा

शायवर्णनमात्रं षष्ठीनिर्देशस्य वक्ष्यमाणरीत्या सुलभत्वादाह षष्ठस्येति आनंतर्यादिरपीति वक्तुनोद्दे उच्चारणे

इति उच्चारणक्रियानिरूपितकर्मत्वमेव प्रतीयतेति भावः ॥ ननु नित्यादिशब्दयोरर्थयोर्द्वे भवत इत्यर्थे स्थानषष्ठ्यभावा

दलोंत्यस्य प्रसंग इति भावः परिहरति प्रकरणेति परिहारस्येति वक्ष्यमाणस्येत्यर्थः इत्यस्मिन्नर्थ इति एवं रूपैः शब्दै

र्द्विर्वीप्साप्रत्ययो न तु हि शब्देनेति भावः सामर्थ्यादित्यायेति आदिना ज्ञापकसंग्रहः सर्वस्येत्यस्य सर्वशब्दस्येत्यर्थवार। राम॰

णाय ज्ञापकांतरमाह नामेडितस्यांत्यस्येति माप्ये संख्यापदं संख्याप्रवृत्तिनिमित्तकपदं। संख्यापाद्येति तेस्य वृत्तिनिमि १

(2A)

त्तरमर्थः अतउत्तरः दशम्यउत्तरं विंशत्याह्वय इत्यर्थः ननुसंख्येयस्यानंतत्वात्यदादीनामेवोपन्यासोऽयुक्तोत आह गणशद्वानु
शासनेनेति। प्रकारो भेदः भगण्ये अपि न द्वैविध्यमिति तदापीत्यर्थः। अत्र मात्राशद्वो वर्णोपलक्षणः नाग्रपुनारति। अंतस्येति शेषः भाष्ये
व्याकरणोपन्यस्तेनेति। परिगणितसामान्येन पुंसकं यइति चापाठः गणसंख्यानं क्रियतेइति ननुसंख्याप्रपगुच्चारणविषयेतिभावः न
नुयत्किंचित्यदद्वयमेवादेशः स्यादत आह अनंतरतमे वा द्वे पदे द्वितीये पदेरेव ननुवाक्ये नाइशापर्वबोधनासामर्थ्यान्नानंतर
नमत्वादिनिभावः नित्यवीप्सयोर्थः शद्वस्तस्येति विषयं स्थानषष्ठी मन्यते यदादीनेवेति प्रत्यासत्येति भावः येके निरिति
पदेइपीत्यनेन संबध्यते। कोविशेषइति। षण्णतशद्वान्तरोपादाने किमेतद्द्वेषेणेत्यर्थः एकत्वस्यानंतमविदितिवीप्सा
विषयव्याप्तिबोधसमये वृक्षरातेकत्वस्याननुभवाद्विभक्त्यर्थः भागेवृद्धिरित्यर्थः पृथगेवविभक्तेरितिविभक्तेः पृथग्भू
तस्यविभक्तिरहितस्येत्यर्थः भागेवृविभक्तेरिति ननुपुंकः पाठः पादाधिकारेतुसप्रयर्णइति पदवाच्यस्यवीप्सायोगाभावान्नेति
षः पादार्थइति पाप्तंपर्यइति पर्यइत्यर्थः पद्वाभावादिति अस्येनस्यार्थकत्वात्सलुत्यस्तेः पुर्वमेवापंनद्विनइतिभावः भा
ष्येहिपदिकेत्रिपदिकेत्युत्तरमाषशः कार्षापणशइत्यपाठः पत्यनहैणो नापिनत्र नन्तिवत्वेर शाकात्वात्स्येनशासंत
स्यापिपदत्वान्नत्सुवेभागस्यापि सुवंनाछसतउस्यत्यापदत्वातवाकास्येतिः अन्यपाश्यामेयानी। पमिनिस्याहनिभावः किं
संख्यायावीप्साअपपरगानाभिसंतेनावयवापर्ववीप्सापशोदृशितिः समुदायवीप्सापक्षमाह अपनिनत्रांत्येषष्ठीसमा

(3)

वै॰ टी॰ ८ सोऽस्त्यपीतिरित्याह तत्र परीति आद्ययोः सप्तमीसमास इत्याह अपतितिसमासेनिवृत्त्यर्थमिति। तमासेविद्यमानस्यानिवृ
२ त्त्यर्थमित्यर्थः तद्धितयोरिति तद्धितपदं तद्धितांतपरं बोध्यं। प्रत्ययलक्षणेनेति अंतरंगानपीतिन्यायेन सर्वतः पूर्वंलुप
लुक्प्रवृत्तेरिति भावः अवयवस्येयद्वतोरिति पूर्वपदस्येत्यर्थः। परत्वाभावइति परेत्वनुअपदादिविधावित्यस्य तद्भिन्नपदांत
विधावित्यर्थः तत्र न तत्स्याप्तिः अन्यथा परेणवीप्सापक्षे दोषानुद्भावनेन भाष्येऽसंगतता स्यादित्याहुः भाष्येत्रिपदिकाइत्य
त्रापीति अपिना द्विपदिकाभ्यां माषश इत्यादौ च दोषः वीप्सायोगादिति वीप्सायामयोगादित्यर्थः। वाक्यस्यः पदसमुदायस्य
वीप्सायुक्तमिति भाष्यस्य वीप्सापदघटितसूत्रोपात्तार्थयुक्तमित्यर्थ इति भावः भाष्येत्र पाप्यवृयवइत्यादिसप्तमीसमा
सदूषणांश्च तत्र योजनवचने आल्लेनविशीर्णानि आवृपूर्विकं चिदिति। किंचिदसंगृहीतमिति क्वचिद्या वृत्त्यर्थेन व्यावर्त्तितमि
त्यर्थः न दोषः अनिव्याप्तिर्न कस्यचिदिति वाक्यविषयेवाव्याप्तिवारणाय वचनांतरमावश्यकमित्याह भाष्ये संगतीति। तथा
चषट्पदाधिकारे इति परिगृहीतावयवापेति अनेनयोगहठायमिति ध्वनितं ननुनेति। न घ्याहिसतिस। तिसमर्थसूत्रादि
स्यभाष्यविरोध इत्यर्थः प्रतिषेधाविधेयइति समसयदस्य यदत्वसत्वात्यदस्य त्यनेन नवारणमिति भावः हठीति अनेनो
वयवानां वीप्साविशिष्टस्यार्थबोधकत्वेनिमित्तं दर्शितेनन्वेववाक्येऽपि द्विर्वचनं न स्यादत आह अन्येहीति वृत्तिविषयाणा एम॰
मेवायं स्वभाव इति भावः। नन्वेवमवयवेनोक्तावपि समासेनोक्ततादृस्यसंगनआह अभिव्यक्तत्वादिति अवयवद्वारेत्यर्थः २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(३A)

वीप्सोक्तोऽयस्य व्यापकत्वमुक्तमित्यर्थः कर्मण्यनीहार इतिभाष्यस्य वीप्सापदमुपलक्षणमिति भावः ननु यदि पर्यायपर्यायो वीप्सा
पत्त्रोऽवगम्यते तर्हि तत्प्रयोगोऽपि स्यादत आगता पौत्वाद्येति पर्वपर्वाधिकरणकसप्तपर्णस्तवधिनिविशिष्टे शक्त्यंगीकाराद्
निभावस्तदाह स्थिर शब्दत्वाद्येति भाष्ये न हि द्विवचनापवादत्वेपि रामन्ते शामनदपवादत्वाभावात् केचिदाहुरल्पायी पीनि। अत्रा
हुर्विवीनं तु तस्यात्या पत्त्वेन मानं पर्णानां षट्व बहुषु सकोरा किंनि जित्यादि सूत्रे पुसंख्या ऽ सहायानां पर्थः सैवेकद्वस्य भाष्ये
उक्तोः ऐको गोत्र इति सूत्रे शेषेये भाष्ये जनपद्यानां प्राप्तमा पर्याकोसुकृ रा वच प्रधानतस्मो तसाधारणात्या पत्वेन मानोस
मानसाधारण पर्णसंख्यापदे कशब्द प्रयोगे स्योव फलितोभवतः किं तात्पर्यकतत्स त्वेपि तदर्पत्वेनैक शब्दस्य प्रसिध्य
भावाद् द्रष्ट्यापीदितिसूत्रेनन्तद्ग्रहणं किंच संख्या शब्दानि रेकशब्दपर्यनां परिगृहीते कत्वानामेव वीप्सा सत्वेन ततोऽप्यत्वाप
वादः शसेवप्राप्नोतिः किंचाल्पत्वस्य परिमाणविशेषतायां अन्तरमिति सूत्रभाष्यके पठयोल्लक्तत्वेन प्रस्तावपर्यानामिव परि
गृहीनिकत्वस्यैव वीप्सेति भाष्यासंगतिः। नचैकं बहुव्रीहिवदिति निनत्वाद्धिन्वेन चनस्य शसपवादः। नात्रामभावादिति वाच्यं स
कपदेन शास्त्रे प्रसिद्धतरतयो संख्यावाचकस्येव ग्रहणेनात्र न दशाप्तेः स्पष्टं चेदमाकिनिज्विधायके भाष्ये किंचैतेन वीप्सा
यां कृतद्वित्वे कशब्दानुवादेन बहुव्रीहिवद्भावस्येव विधिरत एवैकशब्दस्य सिद्धिः नस्मादयमत्र भाष्यार्थः संख्येकवचना
च्चेत्यत्र चेस्यवीः सायामित्यनेन संबंधाद्वीप्सायां स्वार्थे च शसित्यर्थः तत्रास्वार्थिकोऽभिधानस्याभावादेकशब्दात्तद्वि

(4)

कौ॰ टी॰

३

चनैकैकशद्वत्तेनव्याप्तिप्रसंगः एवं चैकशब्दप्रकृतिकशसः स्वार्थिकत्वस्यापि सत्वेन न ततो नियमेन वीप्सोक्तिरिति । नन्वत्र वी
प्सा शस्प्रभावप्रयोगे द्विर्वचने कृते ततः स्वार्थिकः शसिति स्यात्र चेदं भाष्ये बहूनां राक शद्वत्येन त्वार्थिकशसंतं वीप्सार्थक
शसंतं वेत्यत्र शास्त्रे व्याख्यानं लोके प्रकरणादिकं नियामकं बोध्यमिति तः खल्व पीत्यनेन समासनों वै घम्प्रयुक्ते युगपदि
तिविप्रतिषेधविषयविभक्तिं विनेत्यादिः आधारपीस पनियामे यामे पानीयमित्यादो अनेनैव न्यायेन पत्त्रछद्दयोः प्र
योगे उभदाद्य वीप्सां नेच्छंति नन्वाभीक्ष्ण्यरूपनित्यत्वस्य क्रियाधर्मत्वाद्रतो पक्रियावाचित्वात्कथं सुप्रराशद्वस्य द्वित
मतआहाद्वाद्रीतिः तिङ्पुवीप्सापाश्रभावादाहवीप्सेपे निः एवं च पदस्य द्रव्यणोभावेस गतिकयहस्यां सुतरां व्याप्तिमिति तात्प
र्य उक्तं च्येति अत्र फलाभावेनासंबंधादित्यर्थः नच निवेद्विलं धातुमात्रस्य माभूदिति पदस्येत्यावश्यकं किंच सुपः माग्न
र्तिनोपि द्वित्वं वारयितुं नन्त्किं चावाधादिविषये वाक्यद्वित्वमानत्यर्थमिति वाच्यं धातुद्वित्वेन नित्याघर्पा नवगतेः किंच सु
वादिभिः स्वार्थेपरिपुरोसे वलोकस्युत्यत्या शद्वादुपस्थितस्य वहिर्भूतवीप्सादियोगः । तेन तद्विर्वचनप्रसक्तिः आवाधा
विषयवाक्याभावास्व अनभ्यापेच्छांरतत्वेन वाकोद्वित्वमुक्तं नचपदस्येत्यस्याभावे गस्यर्थमः कोद्वित्वमात्रेसावकाशीयः
कौडित्यापोनः पुन्येभपवित्रक्रियायोपरेणद्वित्वेनेवाध्येत एवं भ शापंपोनः पुन्योभयवित्रक्रियामपि तत्तत्वेतु वहि एम॰
रंगत्वाद्विर्वचनस्य पदेः व अतएव च सवरितो वेति सूत्रे लवठवादीनां द्वित्वस्य च समतं व क्तातिभाष्यकार इति वाच्यं एवं विधे ३

(५A)

विषयेउभयपविवक्षेवृत्तानभिधानादित्याशयात्। ननुसामीप्यादीति। अस्याः शंकायाः कोर्थः किंसंभवतीति चिंत्येविशिष्टषष्ठ्यर्थे
तिस्थानेतत्पः कर्मत्वरूपो वेत्यर्थः कथंपुनरस्मिन्नरोपादाने नद्विः प्रयोगनिवृत्तिरत आह प्रकृते पसंभवेस्यितितत्रभावे प
ञ्चम्यसंभवमुपपादयति द्वे इतीति शद्बस्येति उच्चारणक्रियायैः प्रकृते कर्मषष्ठीतिभावः। पदानीति। परंतुकारकषष्ठीसंभ
वे इतरस्याः प्राप्त्यत्वे नद्विः प्रयोगएवस्यादतदर्थं सर्वस्यैव द्विरिति नहुक्तौ नुनत्स्याम पदात्मानषष्ठीतिभावः ननुपचसिश
द्ब एकदावउच्चारणमेवलेभिधत इतिद्विः प्रयोगेप्येकांतरतासिद्धेत्यत आह वृत्तीति उक्तमितिस्मरद्गुणित्यत्रननेआनीयं
ते इत्यं नंनत्रसोमपः प्रतिषिद्धे इति आमएकांतरमित्यनेनेत्यर्थः आमंत्रितस्य चेति षाष्ठिकेत्यर्थः तुनसापुदात्तत्वमि
तित्रिपाद्यामनुदात्तपदमिन्नस्यास्त्रत्वात्तान्त्रपुक्तशेषनिघातस्याभावादितिभावः ननुपुनः शद्बस्यासत्वाविर्त्वेनक्र
पंभावसंवंधयोगोतआह पुनः पुनर्भवितरीति वृत्तिविषयेइतिभावः पुनेः शद्बस्येति आकृतिगणत्वादिसंगतिस्यां
पिस्वरादिपठितस्येत्यर्थः नित्यतासुक्तक्रियाप्राधान्यस्यैनित्यादशक्रियाकारकत्वेरित्यर्थः अत एव न तत्पोभादिसिद्धिः
पश्चैकं शेषेतिसत्सूपप्रातिपदिकसमुदायादेकस्यां विभक्तौ परेन एकशेष इति पक्षे इदं अंतरंगत्वादिति। एवं च सुवंत
त्वायत्रसंघाते पूर्वोभागः पदमितिनियमान्प्रातिपदिकत्वव्यावृत्तिरितिभावः नत्रेत्यपदराद्बसोपविसरत्वेपिन

(2)

(5)

कौ॰ टी॰
४

ह्मानिः ज्ञो केन हान पुंवी कादपि प्रयुज्यमानार्थप्रत्ययेनाथसाप्यर्थवत्वात्वोषावृत्तिस्तु इ्नोवित्यादिवद्वारणीयासुपुस्तुकीनि।
ननुप्रातिपदिकत्वेपिनन्म्रकृनिकसुवंतत्वंदुर्लभंसुवनात्तद्धितोत्पत्तिरितिहिसिद्धांतइतिचेन्नतत्वस्याप्यदेशेनलाभात्।
प्रत्ययग्रहणपरिभाषायांयस्मादित्यस्यसत्वेनप्रकृतरूपाठानात्मातिपदिकप्रकृतिकसुवंनत्वस्यापिशास्त्रीयतान्ध्रति
वृत्स्येति उत्तरस्यनुत्तमुदायपदत्वेनापिसिध्यतीतिभावः अंतरंगवहिरंगानयेपि भोरेतिवृत्त्यमारगोभाष्यगतवोघसमाधा
नेइत्यर्थः त्रैपादिकेनरंगेतरप्रवृत्तेरपायेक्तस्यवहिरंगताभावात्स्वेतिभावः विभाषितान्यपीनिअंतरावाह्त्रिपंक्तिपंप
श्पेत्यादीरवरुद्दयेपिविभाषितेपदुः सिद्धिः राकस्याआकृनेरिति दीहतेतिनिस्पिपितिवोध्यालाघवादितिप्रतिपत्तिलाया
वादित्यर्थः एतनन्यापवीजादिकत्वेवत्यन्यनिरूपितंधात्वाकृतिरितिधानुमत्ययाकृतिभेदाभावाकेवाकृतिरित्यर्थः रूपभे
दाकृतिभेदः स्यादेवेत्यहचेराह प्रत्ययानांयर्थभेशांकायिनात्वीतित्यपागवीस्यास्यस्वेपुचेत्यत्रास्वेपुनीपुनीत्यर्थांतरप्रती
तिर्नैवमत्रेत्यर्थःतत्रभेदशंकैवनलायकीजमितिभावः नित्यत्वादितिभावः प्रत्ययोयः सकारइत्येषनासिद्धातइत्याहआदे
शानुरोधेनेति। ननुपदद्वयस्यादेशत्वात्समानयदस्यलाभावेननिमित्तनिमित्तिनोः कर्षणत्वप्रसंगइत्यतआहस्थानिव राम॰
त्वादिति यत्रेतिपदेः आस्तीर्णमित्यादौ अप्यवेतिपुर्वप्रयोगांनराश्रयेणसमानपदस्यत्वंनेत्यत्तंइदानीमस्थिन्त्रेवप्रयो ४

(5A)

गेऽनिविशेषः मुरोस्संख्यायाः सर्वयाऽविवक्षितत्वात्प्रयोगांतरेणापत्तेश्चचिंत्यमिदं तस्मात्परत्वपर्यास्याधिकरणइत्यर्थः न
चपदसमुदायस्तथेति वोध्यं निपमाद्यमिति नियमश्चाखंडपदत्वाश्रयणरूपः अखंडत्वं च निमित्तानधिकरणनिमित्ति
मत्पदाद्यघटितत्वं तेन मातृभोगीणइत्यादौ णत्वं पदं चात्रार्थबोधकं तेन रामनामगं धर्वगानमित्यादौ नणत्वं नमप्यप
च्चपचन्नित्तिङः मुष्णाग्नेयेइति पुर्वरूपरामनरामानितिणत्वनिषेधादिकं च न स्यादिति चेन्नः द्वंद्वतिद्धिवचनवलेनानत्वमि
तावयवभेदसमुदायस्यैवादेशस्यविधानेन प्रत्येकमपि पदत्वमिति इत्युक्तकै पठेन पदद्वयात्मक आदेश इत्याद्धः भाष्येसु
प्तिङः ष्यामिति पस्मादिति परिभाषासंहृतताभ्यामाभ्यां मदं परसंज्ञां विशेषविषयां करिष्यामइत्यर्थः ननु परस्मा प्तिङः वि
हितः नदादिततंनस्यैव पदत्वं युक्तं पचासि पचसीत्यत्र पत्र आदिः पचशब्दो न तस्माद्यत्येप्तिङ· इति कपसे मुदायस्य पदत्वमत आ
हच्चर्थग्रहणेति· पः पूर्वस्मात्तिङ· विहितः सपरस्मादपीत्यस्यग्रहणे तेऽपयोगश्चित्यः नचाद्धित्वात्पर्वेप्रवृत्ततया लक्ष्यो ज
ण्णस्येतिन्यायेन पुनरप्रवृत्तिः लक्ष्यमेदात् नदादिग्रहणेचेति । प्रत्ययग्रहणइति परिभाषयेवत्तिङपस्मात्प्रत्ययवि
धिरित्यनुवृत्तेरीदृशार्थलाभइतिभावः ययासमुदायस्येतिः समुदायस्यसंज्ञाप्रवृत्तिमात्रेऽपंदृषां तः नेनु नहृदवयवा
नांपदत्वाभावः समुदायपदत्वेनावयवमात्रनिषपदकार्यानिनुग्रहेणातत्माप्यविषयाभावात् अतएवाग्नेग्नेइत्यादौपु
र्वरखंडात्येनपदांतत्वनिबंधनपुर्वरूपादिसिद्धिनिवर्त्तकमिदं प्रकरणमिति नित्यवीसयोरितिसूत्रस्यभाष्येणतपेववो

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan

कै. टी.
५

घवात्ः समुदायेयावाक्यापरिसमाप्तिस्तयापदसंज्ञेति भाष्यस्यतस्यापि पदसंज्ञेत्यर्थइति न विरोधः अन्तरावर्णाहानिरुपपन्ना
अन्यथाऽवयवविषयशास्त्रहानेस्तदवस्थत्वमेवस्यादिति बोध्यं॥ एतच्चैकाचोद्वे इति सूत्रे णानिरूपितं नचैवमनेकपदांत
रत्वस्यापि सत्वेन कपमेकांनरतेतिवाच्यं अनेकपदांतरेनभवतीत्यर्थस्यविधिसूत्रत्वाभावेनविशिष्टस्यापि पदत्वेन पदा
कांतरेभवतीतिविधिस्यस्यार्थस्यसत्वेनादोषात्॥ प्रत्ययवर्णवितिप्रत्ययवपवमात्रंत्वित्यर्थः ननुयोनः पुन्यादेरपि पुंवो
क्त्यायेनसिद्धत्वात्पुनः प्रश्नोऽयुक्तोतआह तद्धितोत्पत्ताविति भाष्ये समर्थादित्येवमिति प्रातिपदिकात्समर्थादित्यत्र पदः प्रा
तिपदिकस्यवचनस्यकृतिकेलक्षणोस्येके सुबंतात्र्यवहितपरत्वं प्रातिपदिकात्तुव्यवहितमितिन क्षतिः॥ अंगत्वंनु व्याप
कत्वात्समुदायस्यैवप्राधान्याच्चराकाचोद्वेइति सूत्रेभाष्येस्फुटमेतत्र प्रातिपदिकात्तादशपरत्वस्याप्यसंभवादाहभाष्ये घवेति
एवंहिः प्रयोगपक्षोपिमाभूस्यापितस्मिन्स्मातत्तापकात्स्थानेद्विर्वचनपक्षोत्राश्रयणमेवयुक्तमित्याहुनचैवंहिः प्रयोगे घटोयं
घटइतिवाक्यस्यापिपदत्वापत्तिः एकस्यैव घटस्य बोधनार्थमेकं प्रति लौकिकोद्विः प्रयोगाभितिनार्थभेदोऽत्रः नेयाच्चमवठोयं
घटआम्रेडितेसत्राप्येकांतरतास्यात् अनः स्थानेद्विर्वचनत्वमेवन्याय्यमितिनिवाच्यांईदृशप्रयोगस्यानभिधानेनादोषात्नि
त्यवीः नन्वाभीक्ष्ण्यवृत्तिनित्यशब्दस्यग्रहणादाभीक्ष्ण्यस्यचक्रियाविषयत्वात्कथमतिप्रसंगोतआह यदानाश्रितेति। अ एप्र०
नपक्षेनित्यशब्दप्रतिपाद्येर्थइत्यर्थः अंगीकृतसामान्येति। तच्चनित्यशब्दरूपमितिनिभावः विशेषेप्रमाणाभावइति। नयाव ५

(6A)

सकविशेषाणांग्रहणमितिभावः अपवेति योर्थः शब्दादुच्चरितमात्रादन्यनिरपेक्षः प्रतीयते स मुख्यः यस्तु शब्दान्तरस्य न्त्रिधा
नादिना प्रतीयते स गौणः इति विभागः क्रियापदेति नित्यं प्रहसितमित्यादौ मुख्यार्थस्य सादृश्यसंबन्धेन प्रतीयमानं स्य गौणत्वात्तं
दर्शयति अविच्छेदोपलब्धीति कुटस्थस्य स्यप्याऽविच्छेदेनोपलब्धिस्तु याग्रहतनादेरपीति भावः सामान्यं सादृश्यं कुटस्थत्वं नाम
किंतदाह येषां चेति न तु सर्वथोत्पादविनाशराहित्यं न स्यात्तथात्वे न नित्या पृथिवी सादेह छेदापत्तेः अत्र पक्षेऽनिषण्णएव
द्वित्वं प्राप्नोति नास्ति च इति भाष्यार्थः तत्र नित्यशब्दतात्पर्यधारणं प्रयोगे बीजमाह तत्र नित्यशब्दस्येति पौनरुक्त्यपरिहारायाह
उभयेति नित्यार्थेनि नित्यशब्दप्रसिद्धार्थस्य यः उभयोपादाने तु तत्सामर्थ्यादभिमतार्थलाभ इत्याह यथाक्रुदेति प्रयोक्तुय
लभ्यमानेत्यादिः ननु पृथ्वीविकाराणां घटादीनामनित्यत्वदर्शनात्कथं नित्यत्वमत आह अवयवानामिति भाष्ये तु स्येदभिस्य
त्रतस्येवेदभिस्यवधारणाभित्याह आभीक्ष्ण्यवचनत्वेनेतिपदान्तरसमभिव्याहारगम्यत्वाच्चास्य गौणत्वमुक्तं शीतोस्त
पार्श्वे शब्दाश्चमंदकारिणी प्रकारिकानन्तूयायत्वा भ्रगणिकादनिबोध्यं यथाभी क्ष्ण्ये इति आभिक्ष्ण्यमेव च क्रियासमभिहार या
ति भृशार्थः पौनः पुन्यं च क्रियासमभिहारः अप्राप्ताद्विर्वचनंमतेति समानकर्तृकयोरित्यादिना पौनरेपिन न विधानान्के
क्ष्ण्य वलयोरस्तपौन नैसामर्थ्याभावान्मत्वेत्युक्ते तदाह प्रस्येत्यादि एवं च न्यायसिद्धार्थानुवादकमेव तदिति भावः एवमाभी
क्ष्ण्ये इत्यस्यार्थकामुक्त्वा क्रियासमभिव्याहारे इत्यस्योदाह क्रियासमभिव्याहारश्चेति एवं च भृशार्थेऽप्राप्तविध्यर्थमेतदि

त

६ निभावः। नन्वेवं भृशार्थे इत्येव वक्तव्ये क्रियासमभिहारग्रहणं व्यर्थमत आह आभीक्ष्ण्यमपीति विधीयत इति लोटो विध्यादौ स
मुच्चये च विधानादाभीक्ष्ण्याभिमुखकौ केवलस्य तात्पर्याभावात् द्विर्वचनमावश्यकमिति प्रतिपादयितुं विधीयत इति तात्पर्यं। पठं ने
द्धि लुं निवारपतित तन्त्रेति द्विर्वचनं भवत्येवेति नित्यवीप्सयोरित्यर्थः सकलावयवविशिष्टक्रियासंख्यादयस्तु नः पुनः पचनीत्यर्थः न
च पौनःपुन्ये पठिः ततो भृशार्थे विवक्षायामपि द्वित्वापत्तिः [illegible] वार्त्तिकं तु लोडेनमात्रविषयमित्यन्येनिरूपयिष्यामः। लो
ड्यपीति भृशार्थविशिष्टयौनःपुन्यप्रतिपादनाय धातुसंबन्धे विधि[illegible] लोडेद्विर्वचने पिभवतेरित्यर्थः तदं न स्येवेति लोडंत
स्यैव न तु पठं नस्येत्यर्थः अन एवाक्रियासमभिहारे लोट् [illegible] वचने सद्भवन इति वचनं क्रियासमभिहारे लोडि
ति सूत्रे भाष्ये पठितमिति भावः। न च पौनःपुन्ये पठिः [illegible] तिमहः तदुर्वारं न च पठोक्तता न्ततत भृशार्थे पिपठोवि
धानेन केवलस्य तद्योतनेसामर्थ्याभावात् इति वाच्यं भृशार्थे इत्येव सिद्धे क्रियासमभिहारग्रहणेन आभीक्ष्ण्ये इत्यस्या
क्षेपकात् पौनःपुन्यस्य केनचिद्योतने सौत्रे द्वित्वाप्रवृत्तिज्ञापनेन पठः नेद्वित्वाभावसिद्धेः धातुमात्रस्येति। पद इत्यन्याधिकार
भावादिति भावः गृहीतसाधनेनिः कुत्सित इति सूत्रस्य भाष्यरीत्या पुर्वधातुः साधनेनेति न्यायेन चान्तरंगत्वात् पूर्वं साधना
कांक्षयात्मत्र पुक्तकार्यं च वर्तुत्तरं न इत्विनाशेरवनहि भृनाभीक्ष्ण्यादि संबंधः इति भावः भावार्थानोनेपि अन्तरंगत्वात्प्रत राम
येत इत्यनन्तरमेव द्वित्वमिति तात्पर्यं स्पनभिधानादपि धातोर्द्वित्वाभावइत्याहा। न च धातुमात्रेति क्रियाविशेषेति। व्याप्तिप्रतिप ६

(7A)

द्विपिबारूपेपयोमरूढिर्यस्येत्यर्थः रूढिमनुद्धेति पाठः तद्भावित्वादिति वीप्सावृत्तेः शब्दस्य द्वित्वमित्सर्थे पदोपचयस्य र्थः रूढत्वेतियंकनादि
वत्तयोगरूढोपमितिभावः रूढित्वेनिपाठोक्तेरवक प्रमोदान्तनवीप्सापक्ष अभिधेयतामावेऽनभिधानं हेतुमाहवेकौषीनीत्यादिश्र
पेक्तिनिव्याप्तिरिति पाठः पिषारूठवीप्सकर्तृत्वस्यतच्चैवसंभवादिति भावः वी।सोस्वरूपंदर्शयतियद्देनिपृथक्कुसंख्यापिकत्वे
हेतुरितरेतरयोगमप्राप्तानितिसादित्यमप्राप्तानित्यर्थः अत्रसहित्यभानाभावात्तेनैकशेषविषयेनद्विर्वचनंपृथक्कुसंख्यायोगश्च
परिगृहीनैकत्वादीनामेवभानादितिवोध्यं केचित्तु इतरेतरयोगंप्राप्तानितिपाठः वोध्येइतिशेषः पृथक्संख्यायोगाच्चैकशेषतौ वै
ल्लक्षण्यंवोध्यमित्याहुः तेषामितरेतरयोगंप्राप्तानितिसरूपकपनयुगपत्प्रहणात्क्रमविवक्षायांनद्विर्वचनंपपाचवने
यंवृक्षः शोभनो यंवृक्षः शोभनइतिक्रमेणशोभनत्वप्रतिपादनेवृक्षशब्दाजांप्रयोगोभवतियुगपत्वाप्तुवन्त्यपिरूपंसं
वंधंयुगपत्प्रतिपादयनेत्यर्थः प्रयोजनमिति। नाभिधेयस्यार्थः अत्रनः किमिदंवीप्सत्वेनेमानयोनरूक्तोऽत्रनवचयवाभिधानं
साकल्येनाभिधानंव्याप्तुमिनिफलतितिसाकल्येनद्रव्याणांक्रियागुणोत्तिग्रामेग्रामेपानीयमित्यादावपिअनुक्तिक्रियायाः सवे
ननयासंवंधस्यप्रतिपादनाददोषः वस्तुतद्दृमुपलक्षणंद्रव्याभावयोरपिग्रामेग्रामेस्वामीशशेशशेनशंगमिसुदाहृनाददो
षः।वस्तुतद्दृमुपलक्षणंद्रव्याभावयोरपिग्रामेग्रामेस्वामीशशेशशेनशंगमिसुदाहरणेध्याघेस्वामीत्वेरेतिसप्तमीभेदा
भावादितिश्राघमतेस्वरूपतंरावनसाभावः अस्येनद्वेनोरसागात्तद्धानाभावः ननुजातेः क्रियांगतामोगांइव्यस्यापिशद्ववाच्य

(४)

के॰टी॰ ७

तांयास्त्रावश्याकतेत्यनत्राहनन्नपयेति। आ सेः पाद्रव्यप्रतीतिर्नतु शद्ववाच्यंतदिति भावः। भेदविषयत्वादिति शद्ववाच्यार्थगत
परस्परनिरूपितभेदविषयत्वोदित्यर्थः शद्ववाच्यभिन्नार्थविषयत्वादिति। यावत् द्विर्वचनविषमानवमवाभिधानस्य स्वरु
पकथनमिदंज्ञानिव्यावृत्तयेएवंपपकुसंख्यायुक्तानितिपूर्वलक्षणोदत्तं अनेनाप्येकशेषस्य व्यावृत्तिरित्याह एकशेषे
पीति। कतिपयानामपीति परिग्रहीनेकत्वानामभाव्रएपकुसंख्यायुक्तत्वाभावः। अनरावेकशेषेप्रसेकंविधेयत्वं बंधो
नियमेन प्रतीयते नहि ब्रह्मणोस्यः शनंदेयमित्युक्तेनियमेन प्रत्येकं शनंदंयं भवति। वृक्षं वृक्षं सिंचतीत्यत्र च न यास्त्रती
तिः द्विर्वचनविषयेऽनवपवाभिधानं स्फोरमनित्यामो त्वामहति। संनिवेशानिरपेक्षोतिसाहित्यनिरपेक्षोत्यर्थः तेनैकशे
षाद्वैधर्म्यं दर्शितं ततः वेषम्यांनरमाहारहतु सर्वैमणाइति। युगपदिति क्रियागुणाभ्यां युगपद्व्यापकत्वेनान्वयं वोधयितु
मिछेत्यर्थः सहविवक्षितानामिति साहित्यभानाभावात्तत्ववोध्यं नदेवाह पृथक्कुसंख्यायुक्तानामिति तदुपपादकमेवप्र
सेकं क्रियागुणायुक्तानामिति युगपदित्यस्य व्याख्या एककालेतिनन्वर्थरूपायावीप्सायाः प्रयोगकर्मत्वमयुक्तमतत्रा
हवीप्साविषयत्वादिति अनेन चज्ञानि शाद्वेपुप्रयोर्क्तवीप्साऽसंभवात न द्विर्वचनप्रवृत्तिरित्युक्तं नदमितिन नुद्धिः प्रयोग
द्विर्वचनपक्षेसमुदायपदत्वायेदमाश्यकमितिकथंनियमार्थसात्व्यक्ताभिप्रायकनानाप्रयोगेषु सेवप्रहं वितस्ए रम॰
वप्रयुक्तप्रतिषेधोद्धाहरणानभिधानेन[illegible]भावात्। तत्रारंभेपितेयपादनासमवाच्चनियमतेसप्रदायेनेवसकला ७

(8A)

पप्रती त्यारा के कसार्थभावात् विधायकत्वासंभवाच्च स्थाने द्विर्वचनपक्षेपि प्राप्नानेकप्रयोगस्य स्थानेनतद्रूपवीभूतं प्र
योगद्वयमेव कर्त्तव्यमिति बोध्यं तेस्थानपक्षे दृशाच्चेतरनिवृत्तिः रेमागमेन रोपधयोरिच्छेति द्विकुर्नित्यवीप्सयोरप्ययोरिति
भाष्येपि सत्र हरणं तु संपाठयां तेन नुनानि वृद्धुनानि वक्त्व्येनानि वहित्यसंगतमत आह वृद्धशद्वस्येति आवृत्तिप्रसंग इति। नचै
नेषाममभावेस्याने द्विर्वचनत्वं नास्तीत्येतद्धिः प्रयोगेपि दोषाः रामानुह्नात तस्यापि तस्मिन्नेकाचो द्वे इति वचनाद्धिः प्रयोगस्य दुर्वार
तयाव्याख्यानस्यैव ल भातुरोधेन शरणीकर्त्तव्यत्वात् नित्यवीप्सयोरित्यस्य शब्दस्येत्यस्य परेरित्यादेश्च सत्वेनाऽदोषाच्चेति
भावः उच्यते परेरितिरावमन्यत्रापि बोध्यं नन्वेनवृपवाभिधानं वीप्सार्थ इति उक्तत्वेन कोटिद्वयाभावात्संदेहानुपपत्तिर
त आह अनवृपवाभिधानमितिः एकवचनश्रुत्येकत्वावसायादिति भावः तदाह ग्रामो ग्राम इति। नास्ति विशेष इति।
ऐनरंगैकत्वमादाय वचनं वृद्धविषयबोधकमित्येव इति भावः सर्वाभिधानशद्वेन विशिष्टस्य वाभिधानं विवक्षितमित्या
ह परीगृहीतैकत्वस्येतिः निर्ज्ञातसंख्यस्येति। एवं चपदाधिकाराभावेपि इदं पदं पदस्यैव तत्त्वाह चर्यान्तिमन्येषामपि न
त्संबंधित्वमेवेति बोध्यं उत्तरकालं तितिः द्विर्वचनोत्तरकालमित्यर्थः द्वितीयाभावइति कर्मप्रतिपादकस्य धात्वतीस्यस्य
प्रातिपदिकत्वाभावादिति भावः मन्यनइति। अतएवात्स्वरस्याद्याष्येऽपरे आह नियस्थांतरो भाष्यानंतच पुर्वस्माद्विशेषमुप

(९)

कै० टी० पारुपनत्तदाशयमाह पुर्वमितिभावः नन्वेवंमत्तियत्तर्हिंश्रातिपदिकमितिग्रंथोऽसंगतइत्यतआह अर्थाभावादितिःएन
८ दपिप्रत्ययलक्षणोनेत्युत्तरमुक्तेर्थेपोजपतिप्रत्ययोजेक्षणमितिप्रत्ययनेनिमित्तमित्यर्थः नन्वसततः सुपः कर्षप्रत्य
पकत्वंस्यादतआह निवृत्तेहीतिनिवृत्तेपीतिवृत्तिस्थाठः अयमेवपक्षोयुक्तोननुपुर्वोक्तइत्याहराकेकमिनीतिआघप
क्षेहिअत्रबहुवचनंदुर्वारमितिभावः ज्ञापकेनाप्ययमेवपक्षोज्ञाप्यतेपितुप्रकृतइत्याह एतस्यैवेतिः तिउं· नहुपत्स्यावयोपप
त्तिमाह विनामीति। अन्मोत्वेतिः एनत्यक्षेपष्ठीचानादरइतिसप्तमीभाष्येपदस्यैतितदर्थस्यैवचार्हिभूतामी क्रुप्यादियो
गादितिभावः प्रकारोतरेणातिशायिकस्यबहिरंगत्वंगत्वंदर्शयतिअथवास्यर्धायामिति। एवंचपरत्वादंतरंगत्वाच्चादितो
शाप्रोतिभावः नयोधाइतिएवंचद्वाचप्रीविस्थेतदनुपपन्नमितिभावः निमित्तभेदादितिशद्वभेदादित्यर्थः द्विलनित्सवोसि
वक्तिनरबादित्वमित्तिशयमितिभावः अवृत्तिजाइतिः अनुपन्नाः वृत्तिजत्वद्विलांतस्यदशाइत्यर्थः इनशद्वेनवेत्तिईश्वरवा
चिनेनशद्वेनसत्पम्यर्थवृत्त्यधिशाद्वस्याव्ययंविभक्तीतिसमासः पोयत्रवर्त्तेनेसतनदधीनोभवतीतिपराधीनताज्ञाभः
निडंः तेद्वित्वेकृतेप्रकर्षप्रत्ययः सुवंतेनुघकर्षप्रत्ययेकृतेद्वित्वमितिउक्तंभाष्येतत्रोपपत्तिमाहक्रियापाषकर्षइतिप एम०
दांर्थांतरापेक्षयाप्रकर्षयोगातस्यबहिरंगत्वयोनःपुन्नेनुस्वापेक्षयेतिअंतरंगमितिभावः सुवंतेत्वेनद्विपरीतमित्या ८

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(9A)

हत्विनिर्वाप्यत्वाद्विर्वचने हित्वप्रकृत्यर्थव्याप्यताप्रतीतिः प्रकृते चातिशयविशिष्टव्याप्यत्वप्रतीतौ नात्यर्यात्पुर्वत्तरवित्तिः
भावः आ घेनुर्यौनः पुन्यविशिष्टक्रियापामतिशयान्वयेऽतिशयविशिष्टायां वा पौनःपुन्यान्वयेन विशेष इति अन्तरं
गत्वाद्वित्वः सुंवंने तु अतिशयव्याप्यत्वमपि पदार्थांतरापेक्षमिति समत्वेपि द्वयोर्विशिष्टव्याप्यत्वप्रतीतिर्निर्वाहाय
पुर्वंत रविनिनात्पर्यं पुर्वं द्वित्वे विवक्षिताप्योग्रंतिपत्तेरप्यर्थविभागो पुंक्त इत्याह किंचेति कृतं द्वितात्तरपि तदंतस्य श्राग्नि
पदिकत्वात्सुपलुक्प्रकारैर्गुणवचनस्येति द्वित्वे कर्मधारयवद्भावात्सुपलुक्पटुपटुरित्यादौ निचात्रापि प्रकारार्थेयोग
स्येतेनीप्सार्थप्रतीतिर्जाभाय पुर्वप्रकृत्यर्थयोगः पर्यायात् द्वयोर्नित्येति सिद्धिरित्यर्थः परेर्वर्जने वाक्यसमासार्थत्वात्सपास स्प
वाक्यवद्विर्वचने प्राप्ते प्रतिषेध इति प्रतिपादयितु वाक्यवत्सारूपाभेदेहशीपत्ति त्रिगुर्त्तोति स्यादिनाः संवंध इति वा कोपं
चमीवोध्यो वत्तौ नु तद्वाध्य इत्यर्थः अपपरी वर्जन इति कर्मप्रवचनीयत्वं पंचम्यपाङ्परिभिरिति पंचमी अपपरिवहि
रिति समासः ननु वाक्यवत्समासेपि परित्रिगर्त्तं वर्जनं वोध्यते इति किमिति समासस्य तत्र शक्तिः कल्प्यत इत्यत आहः अ
हदितिः वर्जनं संवंधाभावः एवं च त्रिगर्त्तनिष्ठाभावप्रतियोगिसंवंधवद्वृष्टिकर्त्तेति वोधः तदाह वर्ज्यमानोपसर्जन इति
अवयवौत्वनर्थकावितिदं चिंत्यं दंद शज हन्त्वार्थवत्ते हरेरन्त्रभाष्यकारैरनभ्युपगमात् घ र्थः परिरिति चिंत्यमिदं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सूत्राप्तरैः केवलेवजनिवर्त्तमानपरेरित्यर्थालाभात्। तस्मादपमत्रभाष्यार्थैः कर्मप्रवचनीयानांस्वंयोगविहितविभक्त्यर्थ
संवधपरिछेदकत्वेनतत्रविभक्त्याभावेउनत्वासंभवान्निरर्थकः परिकिंचवाक्यहृद्यविभक्त्यर्थतिर्भावरणानत्रसमास
स्यैवशक्तिकल्पनपरेस्तयोतकत्वाभावनहिसमासस्यपदार्थानर्भावरणशक्तिस्तत्रतयोनकापेक्षाअनएवशनश्यामा
दाविवाघप्रयोगः परिशदस्तुवृत्तौसाधुत्वमात्रार्थमप्रमुअनेसमूत्रकोपेप्रवधीदित्यादौकर्षोरिवेतिनाकादेरानुनपर
गुणासहनमसूयाकुत्सनेनिंदनंकोपक्रोधः शदे भर्योत्सादनंभर्त्सनमितिकपंतेषामेकार्थत्वमनआहृपयपीतित
त्रकुत्सनेनेतिकार्यविनापिकारणंभवतिननुकारणंविनाकार्यमितिभावः कोपाभावेभर्त्सनंनस्यात्तस्तत्राप्यारो
पितः कोपोस्तीत्याहपपिकुपितादृत्तिद्रदमुपलक्षणंपपहृयाहीनानिंदेरनित्यस्थापितदेवध्वनपन्नाहकुत्सनभ
र्त्सनयहरणोनिएवंतत्र्याहेतिएवंतर्हिपत्नआहमत्पिः स्वामूलैरितिआत्तोसूपाकुत्सनयोः पृथक्यहणंकर्त्तव्यतित
थेत्तदाहगुरवोहीतिविनाप्यसूपयेत्यस्यएवमित्सादिः ननुकोपाभावेभर्त्सवैकर्षत्सादत्नआहभाष्येनीजीनेतिः ए
कंवद्धाहित्तननुद्दित्वसंनियोगेनविधानात्कपमत्रप्राप्तिरतआहकेवलइतिसुपलुकमभ्युपगम्पदोषाभावमु एम॰
क्तासुपजुगेवनोस्तीतियुक्तंनरमाहसम्मात्कः वस्तुतोद्वित्वेकत्नेपिस्यानेद्दिर्वचनत्वेस्यानिवद्भावेनद्विः प्रयोगपक्षेड ९

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai … joint project

(10A)

क्तप्युक्तप्रत्ययांतत्वेनास्य परत्वनिषेधोदुर्वारः पद्विकृ॰ व्रीहिवृद्धाननत्रदेषत्वमात्रेणाप्रनिपादकत्वमुच्यमेनेनर्हिरिदा।
नीमपितुल्यमितिचिंत्यमेवेनत्। पुंवद्भावइत्यपिचिंत्यं सहिसर्वनाम्नोवृत्तिमात्रइत्यनेन वाच्यः सहहिवृत्तिघटकोने
कभागमध्येपुर्वभागस्यैव अतएव शेषेदर्शितिरीपुर्वस्यैदत्यत्रोत्तरपदस्यवनः नचेवंप्रकृनेतस्यादेकइत्यादौदधीत्या
दाविवसुपलुकिन्कृकिलछोलरास्येतिन्यायात्तइहिनस्येवसान्सुत्वापत्तिरितियपाम्वतभाष्यमेमेवरमणीपं। कृते
हित्वेनुलक्कमेदासुनविभक्तिरितिनदोषः नचकार्यातिदेशोऽनेनैवसुत्वापत्तिरितिलक्षणमदातएकइत्यत्रपुनः
सुपदुर्वीरइतिवाच्यं। कार्यानिर्देशेपिप्रातिपदिकत्वरूपकार्यमिवादिशपतेतद्वारैवकार्यांतरस्यातत्रदर्शनात्ततःसु
वल्लोपदिस्वशास्त्रेणोवेतिश्च्यादोषात्। अतएवप्रयोजनानामन्वाख्यानेपरसिद्धांतभाष्येसुपलोपपुंवद्भावावित्यत्रनन्वत
नीः अन्यपासुवुत्पत्तिरपितत्रवक्तव्यास्यात्। ममतुसुपलोपपदेनतन्निमित्तभूतप्रातिपदिकत्वलक्षणमुच्यादोषइति
वोध्यं हिवंचनेसनियोगेनेतिकृनाहिवंचनैकशाद्यानुवादेनेस्यर्थः अनेनैवनहिधानेहिएकशाइतिनसिध्येतपरत्वा
हित्वस्यैवापत्तेः अस्तुनशासपवादः अनेनसहयेननाप्राप्तिन्यायाभावान्नहिर्वचनमप्यनेनेति अर्थविशेषानिर्देशा
दितिभावः भाष्येवीप्साधिकारादितिसमुदायोच्चारणेप्येकदेशेस्वरितत्वप्रतिज्ञानाद्वीप्सापदानुवृत्तिः ननुमध्येपिसं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(11)

कौ॰टी॰ वेधः स्यादत आह परेरिति॥ ननु तैनैव वीप्सोद्दिर्वचनस्य सिद्धत्वात् अनेन पुनस्तद्विधानं व्यर्थमत आह सत्यपीति बहुव्रीहिव
१० द्भावादिति प्राप्तिर्यार्थिक संज्ञातिदेशद्वारेति अस्याशय उक्तः उत्तरसूत्रेरोति। आबाधे चेत्यनेन अत्र पुंवत्वं तु स्त्रियाः पुंव
दित्यनेन अतिदेशवलेनोत्तरपदत्वस्यैकार्थ्ये नभिन्नत्वापत्त्याभावेन च सामानाधिकरण्यस्य सत्वात् इति भावः नन्वेतत्सूत्रवि
षये पुंवत्वं कुतो नोदात्तमित्यत आह एकैकस्येति न चात्रेति द्विर्वचनविषये इत्यर्थः संहितैकपदे नित्येत्यस्य समासग्र
हणसामर्थ्येनात्र एवं पद एव प्रवृत्तेरिति भावः तदेवाह अन्यत्रेति उदाहरणान्तरं कारे इति सूत्रे भाष्यकारेणोक्त इति शेष आन
एकैकयाहुत्येत्यत्र एकयेत्यस्यावग्रहं याजुषाः कुर्वन्ति न चात्रो इत्यादेरूपप्रयोगश्चिंत्यः मयूररोमभिरित्यादौ मुख्यसमासेप्यवग्र
हकरणोनावग्रहे संहितानित्यत्वस्याप्रतिबंधकत्वादिति केचित्॥ ननु सुसुरत्वेनावन्याप्रोगणकपमावाभ्यप्रतीतिरत आ
हननकरोनीति भस्मादीनां कार्यकरणोमायासीदितराव भृंगुतोपिपसात्वंतजागरणाच्चपीडिनः समासानोदोत्तत्वमि
तिव्याप्यधर्मातिदेशे व्यापकधर्मस्याप्यतिदेशादिति भावः पुर्वपदप्रकृतिस्वर इति बहुव्रीहौ प्रकृत्येत्यनेन परत्वादिति॥
अनुदात्तस्यावकाशो भुंक्ते भुंक्तेरित्यादौ रणस्वातिः देशेनुदात्तत्वमेव परमत आह विरुद्धेति। अतिदेशत्वाभावादिति राम॰
भावः कार्यातिदेशे प्यतिदिश्यमानकार्याणामुत्पत्तिदेशस्यैव देशत्वेऽनपेक्षत्वात् तद्वारणं वोध्यं तर्हि पुर्वपदप्रकृ १०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com